चिन्तम् २, चिन्तयित्वा २, } चिचिन्तयिषम् २, चिचिन्तयिषित्वा २, } चिन्तम् २, चिन्तित्वा २, } चिचिन्तिषम् २, चिचिन्तिषित्वा २, } चेचिन्तम् २ ; चेचिन्तित्वा २. }

(524) "चिती संज्ञाने" (I-भ्वादिः-39. अक. सेट्. पर.)

'.... .... .... ... चिन्तयेत् ।

स्मृत्याम्, चेतति संज्ञाने, तत्र चेतयते णिचि ॥' (श्लो. 94) इति देवः ।

चेतकः-तिका, चेतकः-तिका, [1]चिचेतिषकः-चिचितिषकः-षिका, [2]चेचितकः-तिका ;

चेतिता-त्री, चेतयिता-त्री, चिचेतिषिता-चिचितिषिता-त्री, चेचितिता-त्री ;

[A]चेतन्-न्ती, [3]चेतयन्-न्ती, चिचेतिषन्-चिचितिषन्-न्ती ; —

चेतिष्यन्-न्ती-ती, चेतयिष्यन्-न्ती-ती, चिचेतिषिष्यन्-चिचितिषिष्यन्-न्ती-ती ;

— — चेचित्यमानः, चेचितिष्यमाणः ;

[4]चित्-चितौ-चितः ; — — —

[5]चित्तम्-त्तः, [6]प्रायश्चित्तम्, चेतितम्-तः, चिचेतिषितः-चिचितिषितः, चेचितितः-तवान् ;

[7]चितः, [8]चेतनः, [9]चेतयः, चिचेतिषुः-चिचितिषुः, चेचितः ;

---

1. 'रलो व्युपधाद्धलादेः संश्च' (1-2-26) इति सेटः सनः कित्त्वविकल्पः । कित्त्वपक्षे गुणोऽङ्गस्य । एवं क्त्वायामपि कित्त्वविकल्पो बोद्धव्यः ।
2. यङन्तस्य द्वित्वे, अभ्यासस्य गुणे, यङवयवाकारलोपस्य स्थानिवद्भावात् लघूपधगुणो न । एवं यङन्ते सर्वत्र बोद्धव्यम् ।
3. 'अणावकर्मकात् चित्तवत्कर्तृकात्' (1-3-88) इति ण्यन्ताच्छतैव ।
4. कर्तरि क्विप् । चित् = चेतन इत्यर्थः ।
5. 'श्वीदितो निष्ठायाम्' (7-2-14) इतीण्णिषेधः ।
6. 'प्रायस्य चित्तिचित्तयोः' (ग. सू. 6. 1. 156) इति सुट् । एवं क्तिन्यपि ज्ञेयम् ।
7. 'इगुपधज्ञा—' (3-1-135) इति कर्तरि कः ।
8. बाहुलकात् नन्द्यादित्वेन (3-1-134) कर्तरि ल्युः ।
9. 'अनुपसर्गाल्लिम्पविन्दधारिपारिवेद्युदेजिचेतिसातिसाहिभ्यश्च' (3-1-138) इति ण्यन्तादस्मात् कर्तरि शप्रत्ययः; शप्रत्ययस्य सार्वधातुकत्वेन णेरयादेशः । चेतयः = जीवः । अकारान्तोऽयं शब्दः ।

A. 'युष्मा रचेतन् क्षयवायुकल्पान् सीतास्फुलिङ्गं परिगृह्य जालमः ।' भ.का. 10.36.